

# Sri Surya Hrudaya Stotram – Sri Kurma Puranam

# ॥ श्रीसूर्य हृदय स्तोत्रं - कूर्म पुराणम् ॥

The following is a rare **Sri Surya Hrudaya Stotram** from **Kurma Puranam**, **Chapter 18,** which describes the daily duties (**Nitya Karma**) of **Grahasthas** such as bathing (**Snana**), **Sandhyopasana**, **Agnihotra**, **Tarpana**, **Pancha Maha Yajna**, etc. The Puran prescribes that the following hymn on Surya should be chanted while performing **Surya Upasthanam** (immediately after Gayatri Japa and Gayatri Upasthanam) in the morning and afternoon.

The Phalashruti mentions that this hymn on Lord Surya originated from **Lord Brahma** and is being chanted with due devotion by **Rishis**. This hymn is capable of destroying one's sins. This should be given to sons and disciples. A unique phenomenon of this hymn is that it treats **Lord Surya** and **Lord Rudra** as one and the same.

ॐ खखोल्काय शान्ताय कारण त्रय हेतवे ।
निवेदयामि चा ऽ त्मानं नमस्ते ज्ञान रूपिणे ।
नमस्ते घृणिने तुभ्यं सूर्याय ब्रह्म रूपिणे ॥ १ ॥

त्वमेव ब्रह्म परमं आपो ज्योती रसो ऽ मृतम् ।
भूर्भुवः स्वस् त्वं ओङ्कारः सर्वे रुद्राः सनातनाः ।
पुरुषः सन्महो ऽ तस् त्वां प्रणमामि कपर्दिनम् ॥ २ ॥

त्वमेव विश्वं बहुधा सदसत् सूयते च यत् ।
नमो रुद्राय सूर्याय त्वामहं शरणं गतः ॥ ३ ॥

प्रचेतसे नमस्तुभ्यं नमो मीढुष्टमाय ते ।
नमो नमस्ते रुद्राय त्वामहं शरणं गतः ॥ ४ ॥

हिरण्य बाहवे तुभ्यं हिरण्य पतये नमः ।
अम्बिका पतये तुभ्यं उमायाः पतये नमः ॥ ५ ॥

नमोऽस्तु नीलग्रीवाय नमस्तुभ्यं पिनाकिने ।
विलोहिताय भर्गाय सहस्राक्षाय ते नमः ॥ ६ ॥

नमो हंसाय ते नित्यं आदित्याय नमोऽस्तु ते ।
नमस्ते वज्रहस्ताय त्र्यम्बकाय नमोऽस्तु ते ॥ ७ ॥

प्रपद्ये त्वां विरूपाक्षं महान्तं परमेश्वरम् ।
हिरण्मयं गृहे गुप्तं आत्मानं सर्व देहिनाम् ॥ ८ ॥

नमस्यामि परं ज्योतिर् ब्रह्माणं त्वां परां गतिम् ।
विश्वं पशुपतिं भीमं नर नारी शरीरिणम् ॥ ९ ॥

नमः सूर्याय रुद्राय भास्वते परमेष्ठिने ।
उग्राय सर्व भक्ताय त्वां प्रपद्ये सदैव हि ॥ १० ॥

## ॥ फल श्रुतिः ॥

एतद् वै सूर्य हृदयं जप्त्वा स्तवं अनुत्तमम् ।
प्रातः कालेऽथ मध्याह्ने नमस् कुर्याद् दिवाकरम् ॥ १ ॥

इदं पुत्राय शिष्याय धार्मिकाय द्विजातये ।
प्रदेयं सूर्य हृदयं ब्रह्मणा तु प्रदर्शितम् ॥ २ ॥

सर्व पाप प्रशमनं वेद सार समुद्भवम् ।
ब्राह्मणानां हितं पुण्यं ऋषि सङ्घैर् निषेवितम् ॥ ३ ॥

---

**॥ इति श्रीकूर्मे महापुराणे षट् साहस्र्यां संहितायां उपरिविभागे अष्टादशोऽध्याये श्रीसूर्य हृदय स्तोत्रं सम्पूर्णम् ॥**